# संस्कृतवार्ता:

दिनाङ्क : 13.09.25 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना मणिपुरे निवसन्तः जनाः बालकानां सुरक्षित-भविष्यार्थं शान्ति-मार्गे चलनाय अभ्यर्थिताः ।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना मिज़ोरम-आइज़ोल इत्यनयोः बैरबी-सैरांग-नूतन-रेलमार्गं समेत्य नव-सहस्र-कोट्यधिक-रुप्यकात्मिकाः विकास-परियोजनाः शुभारम्भिताः।
- रुसदेशे कामचटकाक्षेत्रे सप्तदशमलव-चतुःतीव्रतायुतः भूकम्पः अनुभूतः, अत्रावधौ सुनामी-सञ्चेतनाऽपि प्रसारितास्ति।
- बेडमिंटन-प्रतिस्पर्धायां सात्विकसाईराज- रंकीरेड्डी चिराग-शेट्टी युगलं विजयेन सह हांगकांग-मुक्त-स्पर्धायाः निर्णायकद्वन्द्वे प्रविष्टम् ।
- मुष्टामुष्टी-प्रतिस्पर्धायां जैस्मीन-लैम्बोरिया, नुपुर-श्योरणः च ब्रिटेनदेशे विश्व-चैंपियनशिप-महिलावर्गस्य निर्णायकद्वन्द्वे प्रविष्टे ।

---

<u>प्रधानमन्त्री मणिपुर- यात्रा</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना मणिपुर-प्रदेशीय-युवजना: अध्यर्थिता: यत् ते शान्त्या- प्रगति-कल्याण-पथि अग्रे सरेयु:। अद्य श्री मोदिना मणिपुरे चूडाचाँदपुर-जनपदे जनसभा अपि संबोधिता। तत्र श्री मोदिना त्रिशदुत्तर-सप्त-सहस्राधिक-कोटि रुप्याकत्मिकानां चतुदर्श-विविध-विकास-परियोजनानाम् आधारिशला अपि स्थापिता। श्री मोदी मणिपुरे एकदिवसीया यात्रारतो वर्तते। प्रधानमन्त्रिणा मणिपुरे विकासाय शांति: सर्वोपरि वर्तते इत्यपि भणितम्। सर्वै: संघटनै: आग्रह: कृत: यत् बालकानां सुरक्षित-भविष्यार्थं शान्ति-पथि चलनस्य महती आवश्यकता वर्तते।

एतासु विकास-परियोजनासु मणिपुर-नागर-मार्गा:, सौविध्य परियोजना:, पञ्च-राष्ट्रिय-राजमार्गीय-परियोजना:, मणिपुर-संचरनात्मक-विकास-परियोजना:, महिला-आवासीय-भवनानि, बहवश्च अन्य-परियोजना: समाविष्टा: सन्ति।

--------------------------------------

<u>प्रधानमन्त्री मिजोरम- यात्रा</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना मिजोरम -प्रदेशे आइजोल-राजधान्यां वर्चुअल-माध्यमेन रेल-मार्गं समेत्य नव-सहस्राधिक-कौट्यधिक-बहव: विकास-परियोजना: शुभारम्भिता:। एता: परियोजना: विविध-क्षेत्रेभ्य: सम्पृक्ता: सन्ति, यथा- रेल-मार्ग, ऊर्जा, क्रीडा इत्यादय:। श्रीमोदिना अष्ट-सहस्र-कौट्यधिक-रुप्यकात्मिका बैरबी- सैरांग-नूतन-रेल-मार्ग: उद्घाटित:। एष: मार्ग: मिजोरमस्य राजधानीं प्रथम-वारं भारतीय-रेल-नेटवर्क-इत्यनेन साकं योजयिष्यति। अवसरेऽस्मिन् प्रधानमन्त्रिण प्रतिपादितं यत् भारत-देश: विश्वस्य सर्वाधिक-द्रुतगामि अर्थव्यवस्था विद्यते। पूर्वोत्तर-देशश्च विकासस्य वाहको विद्यते। तेन एतदपि भणितं यत् प्रशासनं एक्ट-ईस्ट-नीति: पूर्वोत्तर-आर्थिक-वीथ्यां एकां प्रमुख-भूमिकां निभालयति।

श्री मोदिना अवसरेऽस्मिन् प्रोक्तं यत् भविष्ये जीएसटी-इति-परिष्कार: बहूनां पारिवारिक-जनानां कृते लाभदायक: भविष्यति। अवसरेऽस्मिन् रेलमन्त्रिणा अश्विनी वैष्णवेन उक्तं यत् बैराबी-सैरांग-नूतन-रेलमार्ग: पञ्चाशत् सेतूनां निर्माणं समाह्वान-युतं कार्यम् अवर्तत।

इत: प्राक् प्रधानमन्त्रिणा मोदिना अद्य नूतन-त्रि-एक्सप्रेस रेलयानानि शुभारम्भितानि। एतेषु सैरांग-दिल्ली-राजधानी-एक्सप्रेस, सैरांग गुवाहाटी-एक्सप्रेस, सैरांग-कोलकाता एक्सप्रेस समाविष्टा: सन्ति।

--------------------------------------

<u>रशिया भूकम्प:</u>

रूस देशे कामचटका-क्षेत्रे पूर्वीय तट- पार्श्वे अद्य प्रात: भूकम्प: अनुभूत: रिएक्टर-मापिकायां भूकम्पस्य तीव्रता सप्त-दशमलव- चतुर्मित: आकलित:। भूकम्पानन्तरं, कामचटकाया: क्षेत्रे निवसितेभ्य: जनेभ्य: तत्रत्य स्थानीय अधिकारिभि: सुनामी-झञ्झावातस्य संचेतना अपि प्रसारिता।

--------------------------------------

**<u>प्रधानमन्त्री-नेपालः</u>**

भारतेन नेपालदेशे सुशीला-कार्की इत्यस्याः नेतृत्वे सुगठितस्य अन्तरिम-सर्वकारस्य स्वागतं विहितम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना एकस्मिन् सोशल-मीडियासन्देशे सुशीला-कार्की इत्यस्यै अन्तरिम-सर्वकारस्य प्रधानमन्त्रीत्वेन पदभार-ग्रहणाय स्वीयाः शुभेच्छाः प्रकटिताः। अत्रान्तरे नेपालस्य राष्ट्रपतिः रामचन्द्र-पौडेलः अन्तरिम-प्रधानमन्त्रिणः प्रार्थनामङ्गीकृत्य प्रतिनिधि-सभाञ्च प्रभज्य अग्रिम-वर्षस्य मार्चमासस्य पञ्चम-दिनाङ्के नव-संसदीय-निर्वाचनानां घोषणाम् अकरोत् ।

---------------------------------------

**<u>मांडविया-युवासंवाद:</u>**

युवा-कार्य-खेल मन्त्रिणा मनसुख-मांडविया भणितं यत् विकसित भारतस्य युवा-संवाद-नेतार:, युवा-नेतृत्व-युतस्य लोकतन्त्रस्य वास्तविक-दृष्टान्ता: विद्यन्ते। ये सर्वविध-परिवर्तनं कर्तुं शक्यन्ते। अद्य नवदिल्ल्यां समायोजिते विकसित-भारत-यंग-लीडर्स-डायलॉग-षड्विंशत्युत्तर-द्विसहस्रतम-वर्षाय च कृते कार्यक्रमे श्री मांडविया प्रतिपादितं यत् अद्य प्रभृति प्रारब्धा एषा क्विज-प्रतियोगिता आगामि मासे पञ्चदश-दिनांकं समाप्तिं प्रति यास्यति। तेन प्रोक्तं यत् एषा प्रतियोगिता "माय-भारत पोर्टल" इत्यत्र अपि उपलब्धा वर्तते। केन्द्रीय मन्त्रिणा उक्तं यत् मञ्चमिदं विकसित-भारतस्य दृष्टिकोणं प्रपूरयितुं युवजनानां प्रतिभा-क्षमतानां च उपयोगार्थं निर्मित: अस्ति। डॉ० मांडविया वर्येण भणितं यत् इदं विकसित-भारत यंग-लीडर्स-संवाद-कार्यक्रमस्य द्वितीय संस्करणं विद्यते। तेन प्रोक्तं यत् संवाद: एष: केवलं दिवसात्मकं कार्यक्रम: नैव वर्तते वरन् इदं आत्मनिर्भर-भारतस्य अविराम-उपलब्धि-दृष्टिकोण: विद्यते। मांडविया प्रोक्तवान् यत् एष: विकसित-भारत-क्विज कार्यक्रम:, विकसित-भारत-यंग-लीडर्स-संवाद-स्तरस्य प्रथम-चरण: वर्तते। तेन अशेषदेशे निवसद्भ्य: युवजनेभ्य: आग्रह: कृत: यत् ते एतादृशे क्विज कार्यक्रमे अवश्यं भागं गृह्णीयु:। अन्तिम-कार्यक्रम: 'विकसित-भारत-यंग-लीडर्स-संवाद आगामि-वर्षाय' इत्यस्य समायोजनं नवदिल्ल्यां जनवरी दश-दिनांकत:, द्वादश दिनांकं यावत् भविष्यति।

--------------------------------------

<u>कर्नाटक-ओमबिरला</u>

लोकसभाध्यक्षः ओम-बिरला इत्येषः आशां प्रकटितवान् यत् विधानमण्डले तादृशाः मञ्चाः भविष्यन्ति यत्र जनप्रकरणानां सार्थकचर्चाः वाद-विवादाश्च प्रवर्तिष्यन्ते। सहैव यत्र सामाजिक-राष्ट्रहिताय च उपयुक्तनिर्णयाः स्वीकरिष्यन्ते। सः अद्य बेंगलुरु-नगरे राष्ट्रमण्डल-संसदीयसङ्घस्य एकादशस्य भारत-क्षेत्रसम्मेलनस्य समापनसत्रे एतत् प्रख्यातवान् । असौ प्रोक्तवान् यत् द्विदिवसीये अस्मिन् सम्मेलने उद्देश्य-प्राप्तये सहायक-प्रक्रियाणां चर्चा समभवत्। श्रीबिरला प्रोदीरितवान् यत् विधायकाः उत्तरदायित्वयुताः भवेयुः सहैव सदने कृतानां व्यावसायिक-आदानप्रदानानां निर्णयानाञ्च सूचना जनतावर्गाय अपि प्रापयेयुः । सः सांसदानां राजनीतिक-सम्बन्धान् अतिक्रम्य सामाजिक-हिताय सक्रियरुपेण भागग्रहणार्थं आह्वानम् अकरोत् । सः वार्ताहरान् अपि प्रार्थयत् यत् ते जनहिताय विधायकानां सकारात्मक-परिणामानां सूचनां प्रसारयेयुः । तेन आशा प्रकटिता यत् विधानमण्डलानि सप्तचत्त्वारिंशदधिक-द्विसहस्त्रं यावत् विकसित-भारतस्य स्वप्नं पूरयितुं कार्यं करिष्यन्ति।

--------------------------------------

<u>भारतीय-ऋतुविज्ञान-विभागः</u>

भारतीय-ऋतुविज्ञान-विभागेन श्वः पूर्वोत्तर-राज्येषु बिहार-बंगाल-तेलंगाना-उत्तराखण्ड-प्रभृतिषु च तीव्रात् अतितीव्रतर-वृष्टेः अनुमानं संसूचितम्। ऋतुविभागेन हरियाणा- चंडीगढ़-हिमाचलप्रदेश-आन्ध्रप्रदेश- छत्तीसगढ़-मध्यप्रदेश-तटीयकर्नाटक -कोंकण-गोवा-मध्यमहाराष्ट्र-ओडिशा- विदर्भादिष्वपि अद्य अतिवृष्टेः भविष्यवाणी कृता। ऋतुविभागेन प्रोक्तं यत् आगामिषु द्वित्रिदिवसेषु आन्ध्रप्रदेशे गर्जनेन सह विद्युत्प्रपातः सहैव तीव्रवायुना सह वृष्टिः सम्भाव्यते।

--------------------------------------

<u>हांगकांग-मुक्त-बैडमिटन-स्पर्धा</u>

सात्विक-साइराज, रंकीरेड्डी, चिराग-शेट्टी-युगलेन हांगकांग-मुक्त-बैडमिण्टन-प्रतिस्पर्धाया: निर्णायक-द्वन्द्वे प्रविष्टः। भारतीय क्रीडकै: अद्य प्रात: प्रागुवान्त्य चक्रे चीनी-ताइपे

इत्यस्य चेन-चेंग-कुआनं, लिन-बिंग-वेई च एकषिंशति:-सप्तदश, एकविंशति:-पञ्चदश-अकै: पराभूत:। अन्तिमे चक्रे अधुना मुगलमिदं विश्वस्य सर्वोच्च-तृतीय-स्थानिकं युगलेन समं सम्मुखी करिष्यिति।

-------------------------------------

<u>बॉक्सिंग</u>

बॉक्सिंग इति मुष्टामुष्टी प्रतियोगितायां भारतीय जैस्मीन-लैम्बोरिया, नुपुर-श्योराणं च ब्रिटेन-देशे लीवरपूर- क्षेत्रे विश्व-प्रतिस्पधार्यां महिला- वर्गस्य – निर्णायक – द्वन्द्वे-प्रविष्टे।

॥इति वार्ता:।।